॥ श्रीः ॥

# ॥ आदित्यहृदयस्तोत्रम् ॥

भविष्योत्तरपुराणात्

एकचक्रो रथो यस्य दिव्यः कनकभूषितः ।
स मे भवतु सुप्रीतो पद्महस्तो दिवाकरः ॥ १

आदित्यः प्रथमं नाम द्वितीयं तु दिवाकरः ।
तृतीयं भास्करः प्रोक्तं चतुर्थं तु प्रभाकरः ॥ २

पञ्चमं तु सहस्रांशुः षष्ठं चैव त्रिलोचनः ।
सप्तमं हरिदश्वश्च अष्टकं तु विभावसुः ॥ ३

नवमं दिनकृत्प्रोक्तं दशमं द्वादशात्मकम् ।
एकादशं त्रयीमूर्तिर्द्वादशं सूर्य एव च ॥ ४

द्वादशादित्यनामानि प्रातः काले पठेन्नरः ।
दुःखप्रणाशनं चैव सर्वदुःखं च नश्यति ॥ ५

दुद्रूकुष्ठहरं चैव दारिद्र्यं हरते ध्रुवम् ।
सर्वतीर्थप्रदं चैव सर्वकामप्रवर्धनम् ॥ ६

यः पठेत् प्रातरुत्थाय भक्त्या नित्यमिदं नरः ।
सौख्यमायुः तथाऽऽरोग्यं लभते मोक्षमेव च ॥ ७

इति आदित्यहृदयस्तोत्रं सम्पूर्णम् ॥

